यत्नानामुभयस्थानत्वम् । अयोगवाहा विसर्गो जिह्वामूलीयोपध्मानीययोरपि विसर्गविशेषरूपत्वेनाश्रयस्थानभागित्वम् । आश्रयस्थानभागित्वञ्च यमाश्रित्यैते उच्चार्य्यन्ते तत्स्थानभागित्वमतः विसर्गस्य कण्ठ्यो: खरयोर्जिह्वामूलोच्चार्य्यमाणयोराश्रयत्वेन तत्स्थानभागित्वात् जिह्वामूलीयरूपान्वितनामता समुन्नेया । पफयोः परयोरोष्ठोच्चार्य्यमाणयोराश्रयत्वेनोपध्मानीयता । उप पश्च आध्मायेते अनेन स्थानेनेति व्युत्पत्तेः उपाध्मान शब्द ओष्ठवचनः । तत्स्थानयोगत्वादन्वितनामता चावधेया । अतएव "कौमुद्यां जिह्वामूलीयस्य जिह्वामूलमुपाध्मानीयस्योष्ठावित्युक्तम् । यद्यपि सर्वेषां वर्णानामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ युक्तं तथापि तेषां स्थानत्वव्यवहारो वर्णाभिव्यञ्जकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण भाक्त एव । तत्तत्स्थानेषु जिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे आभ्यन्तरप्रयत्नवाच्ये स्पृष्टतादावेव करणत्वव्यवहारः समुचितः । वर्णाभिव्यक्त्यनन्तरभाविनस्तु आन्तरतम्यपरीक्षोपयुक्ताः कण्ठविवरविकाशादेरास्यबहिर्द्देशावच्छिन्नकार्य्यस्य जनका बाह्या यत्ना गुणशब्देनोच्यन्ते इत्यादिकं शेखरादौ स्पष्टम् । आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्रागभाविनो बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः । तथाहि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्ध्वमागच्छन्नुरःप्रभृतीनि स्थानान्याहन्ति उत्पादयति च ततो वर्णान् तदभिव्यञ्जकध्वनींश्च तत्र वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादिकं यदा सम्यक् स्पृशन्ति तदा स्पृष्टता प्रयत्नो यदा ईषत् स्पृशन्ति तथा ईषत्स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता इत्येवमाभ्यन्तरप्रयत्नभेदात् वर्णानां भेदाः । अतएव इचवर्गयशानां तालव्यत्वाविशेषेऽपि चवर्गोच्चारणे कर्त्तव्ये तालुस्थानेन सह जिह्वाग्रादीनां सम्यक् स्पर्शः, यकारोच्चारणे तु ईषत् स्पर्शः शकारेकारोच्चारणे दूरसमीपावस्थानमिति । एतेषां चाभ्यन्तरत्वं ओष्ठप्रभृतिकाकलीजनककाकलस्थानपर्य्यन्तरूपास्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शादिचतुष्टयरूपाभ्यन्तरकार्य्यकारित्वात् वर्णोत्पत्त्यव्यवहितप्रागभावित्वाच्च बोध्यम् । विवारसंवारौ तु गलबिलस्य विकाशाविकाशात्मकौ बाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादिति विवेक्तव्यम् । ते च आभ्यन्तराः प्रयत्नाः केषां वर्णानाञ्चे इत्येतत्तावदधीयते । कादिमावसानानां स्पृष्टता अतएव तेषां सम्यक्स्पर्शवत्त्वेन स्पर्शपदवाच्यता । यणः ईषत् स्पृष्टता । तेषाञ्च स्पृष्टविवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेष्वपि शसादीनां वर्गाणाञ्च मध्यस्थितत्वेन चान्तःस्थवर्णत्वम् अन्तःस्थाभिश्च संयुतमित्युक्तेरन्तःस्थाशब्दः स्यादन्तः । शषसहानां अचाञ्च विवृतता । शषसहानाञ्च ऊष्मशब्दाभिधेयवायुप्रधानत्वात् ऊष्मशब्दवाच्यता । अचाञ्च स्वयं राजमानत्वात् उदात्तादिस्वरवत्त्वाच्च स्वराभिधेयता । "अचः स्वयं विराजन्ते" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अचि" त्युक्तेश्च । तत्र ह्रस्वस्य संवृतता । "संवृतं त्वेकमात्रं स्यात् विवृतन्तु द्विमात्रकम्" इत्युक्तेः ह्रस्वस्यैकमात्रतया प्रयोगे संवृतता प्रक्रियायान्तु विवृततैव । तत्र मूलं "अचोऽस्पृष्टा यणस्त्वीषत् नेमस्पृष्टाः शलस्तथा । शेषाः स्पृष्टा हलः प्रोक्ता" इति शिक्षावाक्यमेव बोध्यम् । अत्राचः स्पर्शाभावरूपविवृतत्ववन्तः यणः यवरलास्त्वीषत् स्पृष्टा इत्यर्थः नेमइत्यर्द्धवाची । शलः शषसहा नेमस्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्धविवृताः । "स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्" इत्येकवाक्यत्वात् । एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः बाह्यप्रयत्नास्तु आन्तरतम्यपरीक्षायामेवोपयोगिन इति "तुल्यास्यप्रयत्नं सवर्णमिति" पा०सूत्रभाष्यादौ स्पष्टम् । तेन तकारस्थाने विवारश्वासघोषाल्पप्राणरूपबाह्यप्रयत्नसाम्येन चकारटकारादिषु "स्थानेऽन्तरतमः" इति पा०सूत्रभाष्ययोः स्पष्टम् । बहुसमानधर्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम् ।" "बाह्याःप्रयत्नाश्चाष्टविधाः काकलकाधःस्थलगलबिलसङ्कोचविकाशश्वासोत्पत्तिध्वनिविशेषघोषाल्पघोषप्राणाल्पत्वमहत्त्वरूपकार्य्यकरा यथाक्रमं विवारसंवारश्वासनादघोषाल्पघोषाल्पप्राणमहाप्राणनामानो मन्तव्याः । प्रयत्नप्रेरितो वायुर्वर्णानभिव्यञ्जन् यत्नविशेषेण गलबिलविकाशादीनपि सम्पादयति अतो गलबिलविकाशादिकरत्वादास्यबहिर्द्देशकार्य्यकरत्वात् चैते बाह्या इति । ते च "खयां यमाः खयः ⁺क⁺पौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्च विवृण्वते । कण्ठमन्ये तु घोषाः स्युः संवारा नादभागिनः । अयुग्मा वर्गयमगा यणश्चा-